बालकस्य वचनञ्च ।
"बालव्यजनमीशस्य मक्षिकादीन् व्यपोहति ।"
इति द्रव्यगुणः ॥
बालव्रतः, पुं, मञ्जुघोषनामकपूर्व्वजिनविशेषः । इति त्रिकाण्डशेषः ॥
बालसन्ध्याभः, पुं, (बालसन्ध्या इव आभा यस्य ।) अरुणवर्णः । इति हेमचन्द्रः ॥
बालसूर्य्यं, क्ली, (बालः सूर्य्य इव) वैदूर्य्यमणिः । इति त्रिकाण्डशेषः ॥ प्रातःकालीनसूर्य्ये, पुं ॥
बालसूर्य्यकं, क्ली, (बालसूर्य्य एव । बालसूर्य्य + स्वार्थे कन् ।) वैदूर्य्यम् । इति शब्दरत्नावली ॥
बालहस्तः, पुं, (बाला हस्त इव मक्षिकादीनां निवारकत्वात् ।) बालधिः । लोमयुक्तलाङ्गूलम् । इत्यमरः ॥ (केशानां हस्तः समूहः क्वि । केशसमूहश्च इत्युज्ज्वलदत्तः ॥)
बाला, स्त्री, (बालाः केशा इव पदार्था विद्यन्ते यस्याः । बाल + अर्श आद्यच् ततष्टाप् ।) नारिकेलः । हरिद्रा । मल्लिकाभेदः । अलङ्कारभेदः । मेध्यम् । त्रुटिः । स्त्री । इति मुद्राङ्किता मेदिनी ॥ घृतकुमारी । ह्रीवेरम् । इति शब्दचन्द्रिका ॥ अम्बष्ठा । नीलझिण्टी । इति राजनिर्घण्टः ॥ एकवर्षवयस्का गौः । यथा,—
"वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी ।"
इति प्रायश्चित्ततत्त्वम् ॥
षोड़शवर्षीया स्त्री । सा ग्रीष्मशरत्काले च प्रशंसनीया हर्षदा च । इति राजवल्लभः ॥ (यथा, रतिमञ्जर्य्याम् ।
"बाला स्त्री प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥"
यथा, मेघदूते । ८३ ।
"गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥"
कन्यामात्रेऽपि । यथा, मार्कण्डेये । २१ । १८ ।
"इयच्च मूर्च्छामगत् कारणं यत् श्रूयतां तत् ।
त्वयि प्रीतिमती बाला दर्शनादेव मानद ! ॥"
पञ्चवर्षा स्मृता बाला । इति हारीते । १ । ५ ।)
अजातद्विवार्षिकी कन्या । तस्याः शवस्य बालस्य च अग्निसंस्कारादिनिषेधो यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया ॥"
इति गारुड़े १०७ अध्यायः ॥
बालाक्षी, स्त्री, (बालाः केशा इवाक्षिसदृशं च पुष्पं यस्याः ।) केशपुष्पाढ्यः । तत्पर्य्यायः । मानसी २ दुर्गपुष्पी ३ केशधारिणी ४ । इति शब्दचन्द्रिका ॥
बालार्कः, पुं, (बालो नवोदितोऽर्कः सूर्य्यः ।) प्रातःकालीनसूर्य्यः । यथा,—
"रक्तवस्त्रपरीधानां बालार्कसदृशीं तनूम् ॥"
इत्यादि विश्वसारे जगद्धात्रीध्यानम् ॥
कन्याराशिस्थसूर्य्यः । यथा,—
"शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यम् ॥
बालिः, पुं (बाले केशे जातः । बाल + इञ् ।) कपिविशेषः । तत्पर्य्यायः । ऐन्द्रः २ बाली ३ । इति त्रिकाण्डशेषः ॥ (अयमेव श्रीरामेण हतः । अस्य जन्मादिकविवृतिस्तु बालिन्-शब्दे द्रष्टव्या ।)
बालिका, स्त्री, (बाला एव । बाल + स्वार्थे कन् । टाप् अत इत्वम् ।) बाला । कन्या । बालुका । पत्रकाहला । कर्णभूषणम् । इति मेदिनी । के, १३० ॥ एला । इति शब्दरत्नावली ॥ कन्यास्वरूपलक्षणं यथा,—
"कन्या देवी स्वयं प्रोक्ता कन्यारूपा तु शूलिनी ।
यावदक्षतयोनिः स्यात्तावद्देवी सुरारिहा ॥"
इति देवीपुराणम् ॥
बालिखिल्याः, पुं, पुलस्त्यकन्यायां सन्नत्यां क्रतोः षष्टिसहस्रसंख्यकपुत्रा ऋषिविशेषाः । यथा,—
"प्रीत्यां पुलस्त्यो भगवान् दत्तात्रिमसृजत् प्रभुः ।
पूर्व्वजन्मनि सोऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे ॥
वेदबाहुं तथा कन्यां सन्नतिर्नाम नामतः ।
पुत्राणां षष्टिसाहस्रं सन्नतिः सुषुवे क्रतोः ॥
ते चोर्द्ध्वरेतसः सर्व्वे बालिखिल्या इति स्मृताः ॥"
इति कौर्म्मे १२ अध्यायः ॥
अपि च ।
"क्रतोश्च सन्नतिर्भार्य्या बालिखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥"
इति मार्कण्डेयपुराणे रुद्रसर्गः । ५२ । २४ ॥
तेषामङ्गुष्ठपरिमाणस्य प्रमाणं यथा,—
"अथापश्यद्ऋषीन् ह्रस्वानङ्गुष्ठोदरवर्ष्मणः ।
पलाशवृन्तिकामेकां सहितान् वहतः पथि ॥
प्रलीनान् स्वेष्विवाङ्गेषु निराहारांस्तपोधनान् ।
क्लिश्यमानान् मन्दबलान् गोष्पदे संप्लुतोदके ॥"
इति महाभारते । १ । ३१ ॥
बालखिल्योऽपि पाठः । यथा, "ऋग्वेदान्तर्गतबालखिल्यमेकादशसूक्तं बालखिल्याः शंसन्ति प्राणा वै बालखिल्याः । इति चरणव्यूहभाष्यम् ॥
बालिनी, स्त्री, अश्विनीनक्षत्रम् । इति हेमचन्द्रः ॥
बालिशं, क्ली, (बालाः सन्ति यस्य इति बाली, मस्तकस्तेन शेते यत्र । शी + आधारे ड ।) उपधानम् । इति शब्दमाला ॥ (ब्राह्मणादिराकृतिगणः । इति पाणिनिः । ५ । १ । १२४ ॥)
बालिशः, त्रि, (बाड़ + इन् । डस्य लत्वं । बालिं वृद्धिं श्यतीति । बालि + शो + आतोऽनुपेति कः ।) शिशुः । (यथा, भागवते ।४।१४।२३।
"बालिशा बत यूयं वा अधर्म्मे धर्म्ममानिनः ॥"
बालिशा शिशुवत्तय इत्यर्थः ॥) मूर्खः । इति मेदिनी । शे, २६ ॥ (यथा, मनुः । ३ । १७६ ।
"अपाङ्क्तो यावतः पाङ्क्त्यान् भुञ्जानाननुपश्यति ।
तावतां न फलं तत्र दाता प्राप्नोति बालिशः ॥"
"बालिशोऽज्ञः ।" इति तट्टीका ॥)
बालिहन्ता, पुं, (बालेर्बालिनो वा वानरराजस्य हन्ता ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥ (बालिवधकथा यथा, रामायणे । ४ । १६ । २७—३६ ।
"सूर्य्यपुत्रो महावीर्य्यः सुग्रीवः परिहीयत ।
बालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ॥
बालिनं प्रति सामर्षो दर्शयामास राघवम् ।
वृक्षैः सशाखैः शिखरैर्वज्रकोटिनिभैर्नखैः ॥
मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः ।
तयोर्युद्धमभूद्घोरं वृत्रवासवयोरिव ॥
तौ शोणिताक्तौ युध्येतां वानरौ वनचारिणौ ।
मेघाविव महाशब्दैस्तर्ज्जमानौ परस्परम् ॥
हीयमानमथापश्यत् सुग्रीवं वानरेश्वरम् ।
प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥
ततो रामो महातेजा आर्त्तं दृष्ट्वा हरीश्वरम् ।
स शरं वीक्षते वीरो बालिनो वधकाङ्क्षया ॥
ततो धनुषि सन्धाय शरमाशीविषोपमम् ।
पूरयामास तच्चापं कालचक्रमिवान्तकः ॥
तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः ।
प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥
मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः ।
राघवेण महाबाणो बालिवक्षसि पातितः ॥
ततस्तेन महातेजा वीर्य्ययुक्तः कपीश्वरः ।
वेगेनाभिहतो बाली निपपात महीतले ॥)
ओड्रदेशान्तर्गतग्रामविशेषश्च ॥
बाली, [न्] पुं, (बालः केश उत्पत्तिस्थानत्वेन विद्यते यस्य । बाल + इनिः । नामनिरुक्तिश्च यथा, रामायणे ।
"अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं बीजं बाली नाम बभूव सः ॥")
इन्द्रपुत्रवानरराजविशेषः । स तु श्रीरामचन्द्रेण हतः । तस्योत्पत्तिर्यथा,—
"मेरुर्नगवरः श्रीमान् जाम्बूनदमयः शुभः ।
तस्य यन्मध्यमं शृङ्गं सर्व्वदेवतपूजितम् ॥
तस्मिन् दिव्या सभा रम्या ब्रह्मणः शतयोजना ।
तस्यामास्ते सदा देवः पद्मयोनिश्चतुर्मुखः ॥
योगमभ्यसतस्तस्य नेत्राभ्यां यदश्रु स्रवत् ।
तद्गृहीतं भगवता पाणिना मार्जितञ्च तत् ॥
निःक्षिप्तमात्रं तद्भूमौ ब्रह्मणा लोककर्तृणा ।
तस्मिन्नश्रुकणे राम ! वानरः संबभूव ह ॥
उत्तरं मेरुशिखरं गतस्तत्र च दृष्टवान् ।
नानाविहगसंघुष्टं प्रसन्नसलिलं सरः ॥
आप्लुत्य चापतत्तस्मिन् ह्रदे वानरसत्तमः ॥
उत्प्लुत्य तस्मात् स ह्रदादुत्थितः प्लवगः पुनः ॥
तस्मिन्नेव क्षणे राम ! स्त्रीत्वं प्राप स वानरः ॥
तद्रूपमद्भुतं दृष्ट्वा व्याजितौ धैर्य्यमात्मनः ।
ततस्तस्यां सुरेन्द्रेण स्कन्नं शिरसि पातितम् ॥
अनासाद्यैव तां नारीं सन्निरुत्तमथाभवत् ।
ततः सा वानरपतिं जज्ञे वानरमीश्वरम् ॥
अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं बीजं बाली नाम बभूव ह ॥
भास्करेणापि तस्यां वै कन्दर्पवशवर्त्तिना ।